॥१॥ ॥श्रीगणेशायनमः॥श्रीसरस्वैनमः॥श्रीगुरुभ्योनमः॥गणेशंकेशवोनत्वा॥
निजांजातकपद्धतिं॥चत्वारिंशद्वृत्तबद्धांव्याख्यास्यामिनद्विदांमुदे॥१॥अहंकेशवः निजांस्वांजातकपद्धतिंव्याख्यास्यामि॥जातस्यदंजातकं॥जातस्यबालकस्यपूर्वजन्मांतरार्जितसदसत्कर्मजनितशुभाशुभफलनिरूपकंशास्त्रमिदंजातकमित्युच्यते॥तदुक्तंलघुजातके॥यदुपचितमन्यजन्मनि शुभाशुभंतस्यकर्मणःपक्तिं॥व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइव॥इदंजातकशास्त्रंहोराशास्त्रसंज्ञं॥उक्तंचसारावल्यां॥होरेतिशास्त्रसंज्ञात्वमस्यतथाहेरार्यस्य॥लघुजातकेपि॥होराशास्त्रंदृष्टेर्मयानिबद्धमिति॥जातकस्यजातकशास्त्रस्यमार्गंव्याख्यास्यामि॥किंकृत्वागणेशंमहागणपतिंनत्वा॥किंलक्षणंजातकपद्धतिंचत्वारिंशद्वृत्तबद्धांचत्वारिंशद्वृत्तैःआर्यावित्रीडितादिभिःनिबद्धांरचितां॥किमर्थं॥तद्विदांजातकशास्त्र

॥१॥

विदांमुदेहर्षाय॥अत्रग्रंथादौग्रंथमध्येनिर्विघ्नेनपरिसमाप्त्यर्थमभीष्टदेवतानमस्काररूपंमंगलमाचरति॥तथात्रग्रंथंकिंकर्त्तव्यमितिशास्त्रावतरणिकांकरोति नाह॥॥नत्वाविघ्नपत्नारदाच्युतशिवेति॥॥अहंकेशवःजातकस्यजातकशास्त्रस्यपद्धतिंमार्गंकुर्वे॥किंकृत्वाविघ्नपत्नारदाच्युतशिवब्रह्मार्कमुख्यान्ग्रहान्नत्वा॥विघ्नपोगणपति॥नारदासरस्वती॥अच्युतःश्रीनारायणः॥शिवःश्रीमहादेवः॥ब्रह्माचतुराननः॥अर्कमुख्यग्रहाःसूर्यादयोग्रहाःएतान्नत्वाजातकपद्धतिंकुर्वे॥किंलक्षणांस्फुटतरां॥प्रकटार्थां

ज्योतींषि ग्रहनक्षत्राणीति

कस्येज्योतिर्विदांप्रीतये॥विदंतिज्योतिर्विदः॥तेषांप्रीतये॥येज्योतिर्विदःस्तएकंहोराशास्त्रंविदोपवंत्येव॥यतोहोराशास्त्रंत्रिस्कंधंस्यंज्योतिःशास्त्रस्यैवस्कंधाउक्तंच॥त्रिस्कंधज्योतिषशास्त्रंहोरागणितसंहिताइति॥तदेवस्पष्टमु

२ कंवराहमिहराचार्यैर्ज्योतिःशास्त्रमनंतभेदविषयं स्कंधत्रयाधिष्ठितं तत्कार्त्स्न्यै
निनयस्य नाम मुनिभिः संकीर्त्यते संहिता। स्कंधेस्मिन्गणितेनयाग्रहगतिः
स्त्रात्रिधानस्त्रसो होराख्यांगविणैश्चकथितः स्कंधस्तृतीयोपरः॥१॥ज्यो
तिःशास्त्रस्य हेस्तुस्यय उपनयः कथनं तत्संहितेरुच्यते॥ अन्येराचार्यैः सं
हितास्कंधादनेकभेदान्मुख्याः पंचाधिकाराः स्तत्रतेत्रयः स्कंधाएवमष्टाधि
कारंज्योतिःशास्त्रमुक्तं॥ ॥व्यक्ताव्यक्तभगोलवासयैनमयः सिद्धांतआदिस्ततो
होराद्राकुनसंहितास्वरविधिस्त्रूडामणिर्विस्तरः॥सामुद्रोयकुमारकोशिक
मिमानष्टाधिकारान्जगुर्वृद्धाः परमेष्ठिसूर्ययवनाःकैमेघमालंजगुः॥२॥त
त्रसंहितास्कंधसेदः। तत्रसौरसावनचांद्रनाक्षत्रादिनाक्षत्राधिमानसंवत्स
रयनर्तुमासपक्षादिफलनवग्रहचारग्रहगोचरफलग्रहशांतिस्नानदानादिनि २
रूपणग्रहसमागमग्रहयुद्धगोटकदिव्यभौमांतरिक्षस्त्रिविधोद्भूतलक्षणाद्भू

तशांतिकर्मविभागकपुरुषस्त्रीगजाश्वादिलक्षणंपंचांगादिसरसन्निरूपणवास्तु
विद्याविजययात्रादेवप्रतिष्ठादिमुहूर्तनिरूपणंबाह्याभ्यंतरस्त्रवद्राज्ञोनानाशुभाशु
भकर्मनद्रव्यधान्यसेनायुधकोटयुधकवियुद्धायुद्धबलादिनिरूपक
स्त्रस्त्रंनानाप्रश्ननिरूपणंइत्यायनेकभेदाः। संहितास्कंधे। तथासूत्राभिधा
नेगणितस्कंधेमित्याह। भास्कराचार्यः॥त्रुट्यादिप्रलयांतकालकलनामानप्रभे
दैःक्रमाच्चाराश्चकसदोद्विधाचगणितंप्रश्नाःस्तथासोत्तराः॥भूधिष्ण्यग्रहसं
स्थितेश्चकथनंयंत्रादियंत्रोच्यतेसिद्धांतोत्रउदाहृतोत्रगणितस्कंधस्त्रबंधैर्बुधैः३॥
अथहोरास्कंधे॥ग्रहराशिस्वरूपग्रहदृष्टिग्रहबलाबलग्रहादिद्वादशभाव
साधनजन्मफलारिष्टारिष्टभंगायुर्दायदशांतर्दशारिष्टनाशभयोगकारक
योगदुष्टयोगयोगायुर्दायनिर्याणयोगनष्टजातकादिनानाभेदाः। होरास्कंधो
एवंत्रिःस्कंधंज्योतिःशास्त्रंएतद्वेदांगंकिल॥वेदास्तावद्यज्ञकर्मप्रवृत्तौयज्ञा
कालंज्ञातुकालाश्रयेण॥शास्त्रादस्मात्कालबोधोयतस्यात्तस्माच्चांगंज्योतिषामित्युपात्तं

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

मस्मात्॥४॥ वेदांगानि॥ ज्यो॒ज्ञास्त्रंमुखंज्योतिषंचक्षुषीश्रोत्रमुक्तंनिरुक्तंचकल्पः
करौ॥ याचशिक्षास्यवेदस्यसानासिकापादपद्महृयंछंदआद्यैबुधैः॥५॥षडंग
मध्येज्योतिःशास्त्रमुख्यमंगं॥उक्तंचवेदचक्षुः किलेदंस्मृतमिति॥एतद्वेदांगत्वाद्
ब्राह्मणैरध्येतव्यं॥ तस्माद्द्विजैरध्ययनीयमेतत्सुण्यरहस्यंपरमंचतत्त्वं॥योज्यो
तिषंवेत्तिनरःसम्यक्कृधमाद्यमोक्षान्लभतेयत्राश्च॥एतदुष्टस्यनैवकथनीयं॥
उक्तंच॥दिव्यंज्ञानमतींद्रियंयदृषिभिर्ब्रह्मंवसिष्ठादिभिः पारंपर्यवशात्तदेहस्य
मवनींनीतंप्रकाश्यंततः॥नैतद्दुष्टजनेदुर्जनदुराचारेचिरावासिनास्यादा
युःस्फुटतस्मयेमुनिकृतांसीमामिमामुल्लंघतः॥६॥एवंज्योतिःशास्त्रंविदुःस्तोहो
राशास्त्रविदोमवंत्येव॥तेषांज्योतिर्विदोप्रीतयेजातकपद्धतीकुवेइतिसंबंधः
अत्रजन्मसमयःस्पष्टःस्फुटोवेद्योज्ञातव्यः॥कैःयंत्रैःघटीचक्रयंत्रफलकादि
भिः॥उक्तंच॥नाडीगोलेवलयंयष्टिःशंकुघटीचक्रं॥चापंतूर्यंफलकंधीरेकपारमा

र्थिकंयंत्रं॥७॥अत्रजन्मसमयेखेटाःवेद्याः॥तेखेटाःयस्मिन्पक्षेघटंतेप्रत्यक्षमा
काशेदृश्यंतेतथागणितयुक्त्यासुगणकेनग्रहाःसाध्याः॥ज्ञास्त्रमाद्यंतदेवैर्यत्
वंप्राहभास्करः॥युगानांपरिवर्तनकालभेदात्केवलमिति॥वसिष्ठोपि॥इत्थं
मांडव्यसंक्षेपात्उक्तंज्ञास्त्रमयोत्तमं॥विस्तरस्तेरविचंद्रादेर्भविष्यतियुगेयुगे॥८॥
विस्तरस्तेविस्तरसनंशिथिलत्वमितिभावः॥ततोनक्षत्रग्रहयोगादिकंवर्त्तमानक
लोयस्यग्रहस्ययस्मिन्पक्षेघटंतेप्रत्यक्षमाकाशेदृ८तथागणितयुक्त्यासुगण
केयाः केनग्रहाःसाध्याः॥मयाइदानींवर्त्तमाननावलोक्यसाधिताः॥तत्रसौरःसूर्यः।चंद्रः
सूर्यात्पंचकलिकोनः।चंद्रोब्रह्मंब्राह्म्यं॥भौमःआर्यजः।बुधश्चंचलोब्रह्मंब्राह्म्यं॥गुरुः
आर्यजः।आर्यपक्षजः।शुक्रश्चलोब्रह्मंब्राह्म्यं।आर्यमध्येज्ञानिःआर्यपक्षात्पंच
भागाधिकः॥राहुःआर्यजः।सर्वेषांस्फुटीकरणंआर्यपक्षजमेव।ततस्तात्का
लिकोकोयनभोगयुक्तइत्यादिकरणैःस्वोदयेरुदयोलग्नंसाध्यं॥सउदयःषड्

स

तथथा। अर्धरात्राउपरि शेषदिनदलेनयुतंसत्रात्रिपूर्व
नतंस्यात्।

इति। तल्लग्नं रात्रिषड्युक्तं अस्तर्क्षं अस्तलग्नं भवति॥ उन्नास्तलग्ने इति।
भावद्वयसाधनेदानीं द्वादशभावसाधनादौ मध्यलग्नपाताळलग्नसाधनं
नतोन्नतपूर्वकमाह॥ रात्रेःशेषमिति॥ रात्रेःशेषंयत्घटिकादिकं रात्रेः इतं
गतं चयत्घटिकादिकं तद्दिनदळेनयुतंसत्रात्रौ पूर्वनतंस्यात्॥ अर्धरात्रात्
प्राक्शर्वरिगतंदिनार्धेनयुतंसत्रात्रौ पश्चिमनतंस्यात्। अहःगतंशेषकंचदिने
इळेनविश्लेषंविश्लेषितंदिनार्धशोधितंसत्दिवसेपूर्वनतंस्यात्॥ दिनार्धा
दुपरिदिनशेषंदिनदळेनविश्लेषंदिनार्धंशोधितंसत्दिनेपश्चिमनतं
स्यात्। तन्नतंत्रिंशोच्युतं॰ त्रिंशाच्युतं उन्नतंस्यात्। तद्यथा॥ पूर्वनतंत्रिं
शा॰च्युतंपूर्वोन्नतंस्यात्। पश्चिमनतंत्रिंशात्च्युतंपश्चिमनतंस्यात्। य
स्यपूर्वोन्नतेति। पूर्वोन्नतषड्युक्तरविर्लंकोदयेर्गमिवत्लग्नवत्साधितंतन्मध्यलग्नं
भवतितन्मध्यलग्नंस्यात्। पूर्वकपाळेउन्नतंषड्युक्तरविर्तः पूर्वोन्नतंचष

ड्युक्तरविश्चपूर्वोन्नतषड्युक्तरवीताभ्यामितिपंचम्यर्थेतसू। पश्चान्नता
दित्यतोलंकोदयैर्लग्नवत्साधितंतन्मध्यलग्नंस्यात्। पश्चान्नतंचआदि
त्यश्चपश्चान्नतादित्यौताभ्यांपंचम्यर्थेतसू। एतदुक्तंभवति। अर्धरात्राउ
परिदिनार्धपर्यंतंपूर्वकपाळेउन्नतंइष्टकालंप्रकल्प्यसषड्भंताकाक्षि
कार्कसूर्यंप्रकल्प्यलंकोदयान्उदयान्प्रकल्प्यतद्भोग्यभागैरुदयैरुक्तउ
क्तिप्रादिकर्मणायलग्नवत्साधितंतन्मध्यमंस्यात्॥ दिनार्धादुपरिरात्र्य
र्धपर्यंतंपश्चिमकपाळेपश्चिमनतंइष्टकालंप्रकल्प्यकेवळंताकाक्षिकं
सूर्यंप्रकल्प्यलंकोदयान्लोदयान्प्रकल्प्यतद्भोग्यभागैरुदयैरुक्तइत्या
दिनालग्नवत्साधितंतन्मध्यलग्नंस्यात्॥ मध्यलग्नंसषड्षड्भानियुक्तं
सुखंपाताळलग्नंस्यात्॥ एवंभावचतुष्टयेसिद्धेतदंतराद्यभावसाधनं
उपचयापचयात्मकग्रहभावफळसाधनंचाह॥ न्यूनोच्यस्तत्रयभस्यिति

व्यस्तरवभस्यत्र्यंशा इति। विगतंअस्तंसप्तमंयस्मात्तत्व्यस्तंचतत्
रवभंचनामदशमंलग्नं। व्यस्तरवभस्यत्र्यंशाः तृतीयोंशाः राश्यादिः भ
यमहतः एकद्विगुणः तनोलग्नेयोज्यः एकत्रएकगुणोतनौयोज्यः अ लग्ने
न्यत्रद्विगुणोयोज्यः एवंद्वितीयतृतीयभावौस्तः सत्र्यंशौ द्विच्युतौ द्वाभ्यां
शोधितः भयमहतोबंधोयोज्यः एकगुणएकत्रचतुर्थभावेदेयः अन्यत्र
द्विगुणोदेयः इत्यर्थः। एवंपंचमषष्ठौभावौस्तः। एवंलग्नादयेषड्वाजा
ताः। तेषूसांगभाराशिषड्युताः जायादयोषड्वाजाताः। एवंद्वादशभा
वाःस्युः। संधिर्द्वियोगोर्द्धितः। द्वयोर्भावयोर्योगोर्धितः संधिः स्या
त्। लग्नद्वितीययोर्योगार्धंतयोः संधिः स्यात्॥ द्वितीयतृतीययोगा
र्धंतयोः संधिः स्यात्॥ एवंसर्वेषांभावानांसंधयः स्युः। अत्रभावद्वय

योगकरणेचक्रार्धिकतायांचक्रंनत्याज्यं। तयाप्रथमभावेभवना
दिस्युः। अग्रिमभावेपूर्णंस्यात्। तदापूर्णभावेद्वादशांशग्राह्यं। शू
न्यंसंधिरिति। संधिषुगतेग्रहेफलंशून्यंस्यात्॥ भावगेग्रहेअर्थात्
अरिक्तंफलंस्यात्। भावगोभावसमेग्रहेसंपूर्णरूपंफलंस्यात्। अं
तरेनुपातः। संधिरवगांतरंभावसंध्यंतरेणाप्तंसत्ग्रहस्यभावफलंस्या
त्॥ तद्यथा। भावान्यूनेग्रहेपूर्वसंधिरवगांतरं॥ भावाधिकेग्रहेत्व चेव
परसंधिरवगांतरं॥ परसंधिभावांतरेणाप्तंग्रहभावफलंस्यात्। पूर्व
संधिरवगांतरंपूर्वसंधिभावांतरेणाप्तंग्रहफलंरूपादिकंस्यात्॥ यस्य
भावस्यषष्ठ्यंशकल्पनयाग्रहस्यतद्भावफलंशुभंअशुभंवाज्ञेयं। भावा
धिकेअल्पेग्रहेसतिफलंक्षयःक्षयंअपचयउपचयवदंस्यात्॥ ॥
॥ ॥ इतिश्रीसकलागमाचार्यवर्यकेरावदेवज्ञविरचितायांजा

६ तत्कर्मपथतोस्वोक्तटीकायांसर्वत्रेहफलजातमात्रोपयोगोभावाध्यायः॥ ॥अथग्रहदृष्ट्याश्रितजातकोक्तबलनिर्णयार्थंदृष्टिफलार्थंसविशेषग्रहदृष्टिसाधनाध्यायंवृत्तेनैकेनाह॥खेकाग्निरिति॥खेरागमादयोंकाःदृष्टावर्जितदृश्यकस्यएकादिसं०॥एकोदिराशोभादिजाःराश्यादयोभवंति॥तत्रैकेसंख्यादिसंएकः।त्रिनेत्रयः।चतुर्थद्विपंचमेखंषष्ठभेवेदाश्चत्वारः।सप्तमेरामाः त्रयइत्यर्थः।अष्टमेशरमोहो॥नवमेएकः।दशमेखंएकादशेजभं।द्वादशमेऽन्त्यं।खाभ्राभमित्यत्रसमाहारेकवद्भावः।पश्यतिदृष्टा।दर्शनाद्दृश्यः॥दृश्यएवदृश्यवर्जितदृश्यकस्यैकादिसंएतअंकास्यःचेद्गुणाद्दृष्टावर्जितदृश्यकस्य।अष्टवेदभेऽष्टसंचतुर्थेवेदाश्चत्वारोंकाःस्यात्नपूर्वोक्ताः।मंदनदृष्टावर्जितस्यदृश्यकस्यअंकयमेनवमेद्विसंचवेदाश्चत्वारोंकाःस्यः।नपूर्वोक्ताः।अस्तंगोसोमनदृष्टावर्जितस्यदृश्यकस्यनगुणस्यासप्तसंत्रिसंचत्वारोंकाःस्यः।नपूर्वोक्ताः।एवंदृष्टावर्जितदृश्यकस्यभादिजोयोंकादिजोभवति।सप्तागभ्रसयदधिखानळ२०लवेनसस्कार्यः।एतदुक्तं

६

भवति॥राश्यादिजोयोंकस्तत्तत्परांकोयःस्वयंन्यूनस्यात्॥यद्वा।यादृधियदधिकंस्यात्तयोरंतरेणराश्यधस्थभागाःगुण्याःखानळैस्त्रिंशद्भिः३०भाज्याःलब्धेनसोंकःसंस्कार्यः।कथंपरस्यैहीनःपरदृग्योगकःकार्यः।ततोविचक्षणतुल्यकःमनदृक्दृष्टिभवेत्॥ ॥इतिश्रीकेशवदैवज्ञविरचितायांपथतोस्वोक्तटीकायांसविशेषदृष्टिसाधनं॥अथग्रहाणांबलाबलसाधनंविनासर्वजातकोक्तफलनिर्णयंदृग्गणितैक्यादिनिर्णयंकर्तुनेशतेतरां॥ ॥तत्रोबलसाधनाध्यायःआरभ्यते।तत्रबलंस्थानदिक्कालश्चनैसर्गिकश्चेष्टा।दृष्टिभिःषड्विधं।तत्रस्थानबलंपंचधा।उच्चबलंसप्तवर्गबलं।समविषमराशिनवांशकबलं।आदिमध्यांत्यद्रेक्काणाधिपतिपुंनपुंसकस्त्रीग्रहबलं।केंद्रादिगतग्रहबलं।एवंपंचधास्थानबलं।एकधैव।कालबलंचतुर्धा।दिनरात्रिबलंदिनरात्रित्रिभागेशबलं।सहोरादिदिनमासाब्दबलं।पक्षबलं॥नैसर्गिकंएकधैव।चेष्टाबलंअयनबलं।चेष्टाकेंद्रजंच।कदाचिज्जन्मकालेग्रहोसमकलोस्तः।तदाबलदृधियासाचेष्टाबलभेदश्चदृग्व

लंएकधेव॥एवंपचदशाधिग्रहबलं॥तत्राहोरात्रानबलभेदेषु उच्चबलंसप्तवर्गबलंचाह॥
नीचोनोभगणाच्यूतः। इतिनीचोनोयातिग्रहस्यैतत्षडधिकस्तहिभगणाच्यूतः१२
चक्रात्शोध्यः चेत्षड्राशिः तर्हियथास्थितएवत्यर्थसिध्यं। राश्यादिकःषट्कृतः
षड्युक्तःकार्यः। ओच्चंबलंस्यात्। यदानीचोनोग्रहस्यसंपूर्णाः षट्राशयः स्तदोष
ड्युक्तःपूर्णरूपंबलंस्यात्। यदाषड्भ्योल्पास्तदारूपच्छानेप्रथमंशून्यंग्राह्यं। ततस्त्रा
शून्याद्यंषष्ठ्यागुणितंविकलास्तच्छानात्स्वहारणापरिनीयापद्विहृत्वा० लब्धं
शून्याद्यःषष्ठ्यंशाः स्तेमाः। तद्विषष्ठ्यंशाः स्तदधोदत्त्वा। एवमुच्चबलंस्यात्। अ
स्तंयादीनांनीचानि। ० ३ २८ २२ १८ १५ ३० ० अथसप्तवर्गजबलं। स्वर्क्षधमिति। स्वर्क्षे
स्वभवनेग्रहेअर्धबलं३०। स्यात्। समेअष्टमांशाः ३०। मूलत्रिकोणत्रयश्चरणाः ३०
बलं। मित्रराशेरंघ्रिश्चरणाः ३०। अधिमित्रभेष्टमांशाः अष्टमांशाः स्त्रयः ३३ वैरि
भेअष्टांशाः षोडशांशाः ३। अधिवैरिभेदंतांशाः द्वात्रिंशद्भागाः। ३। रूपस्थितिसर्व
त्रार्थसिद्धं। ग्रहाधिपवर्गादिनिखेटस्यग्रहादिसप्तवर्गपतिवर्गात्सप्तवर्गाधि

पेभ्योयथास्वानोक्तानिस्वर्क्षधमित्यादीनिसप्तबलानिग्राह्याणि। तेषांसप्तानांबलंऐक्यजं
सप्तवर्गजबलंभवति। एतदुक्तंभवति। ग्रहोयस्मिन्गृहेअस्तितत्गृहस्वामिनःस्वर्क्षादि
उक्तबलंग्राह्यं। एवंहोरादिस्वामिनांग्राह्यं। तदैक्यंतस्यग्रहस्यसप्तवर्गबलंभवति। तस्यग्र
हस्यअत्रकेचन। पादोनंतुंगबलं त्रिकोणगृहगइति। ग्रहस्यग्रहस्वानेदेवअष्टमबलं
गृहंतितदयुक्तं। सप्तवर्गजमितिसप्तसंख्यानियमात्॥ अथपुंस्त्रीराद्विगतग्रहबलं।
तथाकेंद्रादिगतग्रहबलं। तथाद्यमध्यांतद्रेक्काणगतपुंनपुंसकस्त्रीबलंचाह। शुक्रेंदू
समभांसेकेति०॥६॥ समभांशकेनास्तितौशुक्रेंदू०॥ अंघ्रिरूपांघ्रिबलंदद्यातांवि
षमेभांशकेंवा०॥ अन्येरविभौमबुधगुरुमंदाः अंघ्रिबलंदद्युः॥ भंचअंशकश्च०भांशक
मित्यत्रद्वंद्वैकवद्भावः॥ अत्रश्रीपतिपक्षतिटीकाकारेणअंशमुख्यत्वंशुक्रं॥ समंस्त्रीभ
वनं॥ विषमंपुरुषभवनं॥ तदसत्॥ यतःसर्वेषां जातककाराणामतेनस्यात्॥ उक्तंच
लघुजातके॥ चंद्रसितौस्त्रीसंज्ञेपुरुषसंज्ञोपगाः रोषाः॥ एवमन्येष्वपिग्रंथेषुसंज्ञाराशि
रेव॥ राशिशिसमयोरास्तांशोपिबलंस्यात्॥ यदाशुक्रेंदूसमअंशोचभवतः तदेकपाद

एवबलं॥नपादद्वयं॥एवमन्येषांविषमेमंदरोचिस्थितानांएकचरणएवबलं॥नचरणद्वयं॥
अथकेंद्रादिषु॥केंद्रेपणफरआपोक्लीमेषुगताः ग्रहाः क्रमेणद्वयं०अर्धं॥चरणबलं
यच्छंतिदृहति॥तद्यथा॥केंद्रगाःद्वयं॥पणफरगाःअर्धं॥आपोक्लीमगाःपादं॥बलंय
च्छंति॥अत्रकेचित्भावषड्यंशाकल्पनया॥त्रैराशिकमूहंति॥यैतदप्ययुक्तं॥अथ
स्त्रीखेटोच्चेइंदुशुक्रौ॥राशितृतीयद्रेक्काणस्थितौपादबलंयच्छतः॥नराःगुरुसौमार्कीःप्र
थमद्रेक्काणेपादबलंयच्छतः॥क्लीबौबुधशनी॥मध्येद्रेक्काणस्थितौपादबलंयच्छतः॥॥
इदंपंचविधस्थानबलंसुस्थितं॥॥अथक्रमप्राप्तंदिग्बलमाह॥मंदालुग्नमिति॥७॥मंद
तुरगेश्वरात्लग्नंशोध्यं॥इनात्तुरयतिथाकुजाच्चहिबुकंचतुर्थंशोध्यं॥विधोश्चंद्रात्तृ
थाभागंवात्सप्तमंशुक्राच्चमाध्यंदशमंशोध्यं॥ज्ञातबुधात्तथागुरोश्चअस्तसप्तमंशोध्यं॥
शेषंचेद्दशभात्पुष्टंषड्राधिकंभवतितदाचक्रंतच्चयजेत्॥चक्रात्तुशोध्यंषड्भात्यं
अथात्ययथास्थितमेवातद्राश्यादिघस्रंदृहतिषड्भिर्भाज्यंअत्रभाजनविधिस्तुउच्चबला
न्नयनेप्रागुक्तःसोत्रज्ञेयः॥इतिदिग्बलसाधनं॥अथकालबलमाह॥अथोसमयजंरूपमिति॥८

अथोसमयजंकालबलमुच्यते॥अत्रविदोबुधस्यसदादिवाराद्योवा
रूपमेवबलंस्यात्॥त्रिंशाद्भक्तेनतोनतेक्रमेणार्किकुजाकीर्णांपरेषांअ
न्येषांबलेभवतः॥एतदुक्तंभवति॥त्रिंशाद्भक्तंनतंसत्यंलब्धंतदेवार्कि
कुजाकीर्णांत्रयाणामपिबलंस्यात्॥त्रिंशाद्भक्तंउन्नतंसत्यंलब्धंतदे
वपरेषांगुरुशुक्राणांत्रयाणामपिबलंभवति॥॥अथान्यत्कालभेदत्रय
माह॥शुक्लेत्येतिथिहृदिति॥८॥शुक्लेशुक्लपक्षेअंतेसंशुपक्षेतिथि
हृतंपंचदशाहृतेष्वतिथयःक्रमेणसंतांशुभग्रहाणांबलंभवति॥एत
दुक्तंभवति॥शुक्लपक्षेगतास्तिथयःपंचदशाहृताःकार्याः॥कृष्णपक्षेशे
षास्तिथयःपंचदशेभ्यःशोधिताःशेषाभवंति॥यस्मातांशुभग्रहाणांच
बुधस्यकृष्णांबलंस्यात्॥तदेवरूपंरूपात्शुद्धंपापानांरविभौमा

दीनांबलं स्यात्॥ इदं अत्रागतं बलं विधोश्चंद्रस्य द्विगुणं कार्यं। इदं पक्षबलं। अथ अहोदिवस्य त्र्यंशकेषु प्रथमद्वितीयतृतीयेषु। सौम्याकुजसितवांत्र्याणां क्रमेण तथा निशाः रात्रेः त्र्यंशकेषु त्रिषु ज्ञार्किसिताराणां रूपबलं स्यात्। इज्यस्य गुरोः सदा सर्वकालेषु रूपबलं स्यात्। येनोक्तं भवति। दिनस्य प्रथमत्र्यंशे जन्मतः सौम्यस्य बुधस्य रूपबलं स्यात्। द्वितीये अर्कस्य। तृतीये अर्कभुवः रानेः रूपबलं स्यात्। रात्रेः प्रथमत्र्यंशे चंद्रस्य। द्वितीये भृगुजस्य। तृतीये भौमस्य रूपबलं स्यात्। सर्वकालेषु गुरोः रूपबलं स्यात्। इदं कालबलं स्यात्। अथ वर्षाधिपतिबलं। अंघ्रिघ्न्यात् पादवृध्या समा। मासदहरेश्वरः क्रमाद्बली स्यात्। जात्येकवचनं एतदुक्तं भवति। समाधिपो वर्षाधिपो यो ग्रहः स्यात् तस्य एकपादबलं स्यात्। यो मासाधिपः तस्य पादद्वयं रूपार्धबलं स्यात्। यो दिनाधिपः वासरः तस्य पादत्रयं पादोनरूपं बलं स्यात्। यो होराधिपः कालहोरापतिः तस्य पादचतुष्टयं रूपं बलं स्यात्। दिनपतिकालहोराप्रसिद्धौ। वर्षमासपत्योः अनयनाय श्लोकाभ्यामाह॥ सचंद्रः द्विघ्नायं ग्रहलाघवघ्ननिचयश्चक्रहृतः षड्भ

रसैः ६ षड्रसैश्च २६ युतः सबाणतपनः १२५ सेषुश्चरवांगाग्निभिः ३६० खाज्यैर्विहृतः ३० फलैर्गुणयमरंध्रचक्रनिघ्नास्तु ५ खा० पेतद्विघ्नि २ त्रि ३ युतैर्नगा वर्षितकैस्तु कालसमा मासपौ॥७॥ द्विरूपाढ्यपिंडो रदैर्युताक्षयुगिति। द्विरूपाढ्यपिंडो रदैः ३२ युताक्ष युक्तरवांगाग्निहृतः ३६० खाग्नि ३० हृतैः फलैर्युतौ वेदगुणौ इस्त्रि ३ हृतद्वि २ ऋषि ७ हृ ४ तैकाहर्गणतुल्यौ क्रमेण दमासपौ॥७॥ ग्रहलाघवात् पूर्वप्रसाधनतुल्यादहर्गणैः। त्रीन् आगम्य कं समाप्रसाधनतुल्यं द्विपिंडं स्वत्र योज्य संधयाप्य एवं चतुर्भिर्दं कालबलमुक्तं। अथ द्विघ्नचेष्टाबलमेवं। मायनबलं लंबजंग्रमात्तनाह। सदा क्रांतिभागैः सदेवतिथ्यैः सौम्यैर्धनिसिद्धाः चतुर्विंशतियुक्ताः एवं कार्याः। रानीदोः क्रांतिभागैः याम्यसौम्यैः क्रमाद्धतानाः सिद्धाः॥२४॥ कार्याः सौम्यैर्युक्ताः कार्याः सौम्यैरूनाइत्यर्थः। परेषां अन्येषां रविगुरुकुजशुक्राणां विलोममिति। एतेषां याम्यैः क्रांतिभागैः सिद्धा रूनाः कार्याः सौम्ययुक्ताः कार्याः एवं ते सर्वेजांभोधिरूपक्रकार्माः अष्टाचत्वारिंशदुक्ताः एतेषां सर्वेषां अयनबलं स्यात्। एतत् आगतं सूर्य

स्यदृग्ज्ञेद्विगुणंकार्यं। एतत्प्रमनबलंस्यात्। केचित्तु शारसंस्कृत्योक्तं तदसत्। यतोयह
स्यया म्योत्तराभ्रितमुखेनभेयनगमनंक्रांतिवशादेव। शारवशात्। यतो ग्रहस्यशारः
क्रांतिस्त्रएवनष्टथकृअतो ग्रहस्यमुखवलनंक्रांतिवशादेवानउक्तंमहताप्रबंधेन
सिद्धांतशिरोमणौ। वलनामयनेक्षेपः क्षिप्तोयस्तेकुबुध्यइति। एवंअयनबलसाधन
क्रांतेः शारसंस्कारोनास्तीतिसद्युक्तिः। इत्यायनबलंअथमुख्यचेष्टाबलमाह॥ ॥मध्यस्प
ष्टकृतेति।१।२०। मध्यात्सकाशात्स्पष्टविवृधहानिः। स्पष्टाविवृधहानीतयोर्दलंस्पष्ट
विवृधहानिदलंतद्भजतीतिदळभाकृदळभाकृचासोमध्यश्चदळभाऽमधः तेनउनंचत
त्शीघ्रंच। स्पष्टस्पष्टविवृधहानिदळभाऽमध्योनशीघ्रंकुजात्मध्यश्चस्पष्टश्चम
ध्यस्पष्टोतयोर्युतिः। तस्यादलंनउनितंचतच्चलंचलदलोनितंचलं। कुजमारभ्यपचानां
केंद्रंचेष्टाकेंद्रंस्यात्। तच्चतषऽधिकंभगणात्चक्रा१२त्त्यक्तंकार्यं। षऽल्पंयथास्थित
मेव। षट्टतंषड्भिर्भज्यं। कर्यं। ऊच्चबलोक्तरीत्याचेष्टाबलंस्यात्। एतदुक्तंभवति। मध्यात्स
काशात्स्पष्टयोर्वृधिहानियोर्यत्तस्याःदलंमध्यग्रहेकार्यं। वृधर्दलंमध्यमेयोज्यं। हानेर्दलंम
ध्यमेक्ष्यं। तेनमध्यनशीघ्रंशीघ्रोच्चंकार्यं। मध्यग्रहस्पष्टग्रहयोगःकार्यः तस्याधेनेचलो ९०

च्चंशीघ्रोनितंकार्यं। एवंकुजादीनांशीघ्रकेंद्रंस्यात्। तस्माऽच्चबलवत्। चेष्टाबलंस्यात्। अ
त्रफलद्वयार्धसंस्कृतमध्यग्रहेणशीघ्रोच्चंउनंलंतंसत्चेष्टाकेंद्रंसक्रंचक्रार्धतपा
कंदृश्यते। यतःश्रीपतिपथतोऽन्यत्स्पष्टग्रहमितिभ्रांतिपाठः। यतःसाधफलद्वयसं
स्कृतमध्यग्रहोनचलोच्चंअत्यंतमयुक्तंस्यात्। अत्रजलान्मध्यग्रहमितिपाठेनफ
लद्वयार्धसंस्कृतमध्यमचलोच्चंसघुक्तंकेंद्रंस्यात्॥ अतएवश्रीधराचार्य
णोक्तं। स्फुटश्चेच्छीघ्रकेंद्रेमेतच्छेषार्धंधनंबले॥ स्फुटेवाशुध्यतेमध्येतच्छे
षार्धंभयोभवेत्। ततोमध्योनितंकृत्वातच्चक्रार्धाधिकंयदि। संशोध्यभ
गणात्तस्मात्षड्भिश्चेष्टाबलंहृतात्॥१॥ तथादामोदरपऊनावपि॥ स्फुट
मध्यमयोरैक्यंदलितंशोधयेच्चलात्॥ चेष्टाकेंद्रमिति॥ इतिद्विभेदचेष्टा
बलं॥ अथनैसर्गिकबलमाह॥ ॥ स्यादेकोत्तररूपमिति। सप्तसुको
ऽष्वेकोत्तररूपंसप्तभिर्हृतंसत्मंदादिसप्तग्रहाणांबलंस्यात्॥

॥ चंद्रसूर्यौ विना। सूर्ये अस्तं। चंद्रेसमागमः। नयुद्धं॥२

अथ कदाचिद्विशेषमाह। युद्धेबाणवियोगेति। कदाचिज्जन्मकालेग्रह योर्युद्धं भवतीति। समकालेग्रहौ स्तः तदा तयोः कालात्मकौ वा एकौसाध्यौ तथातयोः पूर्वोक्तानांबलानां निजानांऐक्यं इतियोगो कार्यो॥तयोर्वीर्ये कस्मि न्ययोरंतरंबाणयोरंतरेणाहतंकार्यं। यद्युद्धं तेनोन्नतरादिदृष्टेन तस्य ग्रहस्यबलंसहितंकार्यं॥ दक्षिणस्थस्यबलंहीनंकार्यं॥ अयंकदाचि त्संस्कारःचेष्टाबलमेदः॥ ॥अथदृग्बलमाह॥ सदृष्ट्यंघ्रियुगिति॥ स्वटकीर्यंसदृष्टियुक्कार्यं॥ उग्रदृष्टिचरणोनमिति। पापग्रहदृष्टिचतु र्थांशेनहीनंकार्यं॥ इतिदृग्बलं॥ अथग्रहाणांवर्षमुक्त्वादानींभावानांब लमाह॥ भावानांबलमीश्वरस्य इति। भावादीनांयेअत्रयेबलवादीनांबलंईश्व रजंस्वस्वामिजंस्यात्। अत्रान्योविशेषः। नरचतुष्पदादिभावाः नरचतुष्पदाख्य

कीटांबुजाःराशयःस्युः। तेक्रमेणजायांबाद्यूनभोनिताःकार्याः तनस्ते भ्योदिग्वीर्यवदिति। दृग्बलाच्चबलवत्तुरीयाबलंस्यात्॥ एतदुक्तं भवति। अत्रयेनैराशिभावास्तेसप्तमभावोनिताः कार्याः। चतुष्पदास्तेचतुर्थभावोनि ताः कार्याः। येकीटास्तेलग्नोनिताः येजलचरास्तेदशमभावोनिताः तेभ्यो दिग्वीर्यवद्बलं। तेनतस्यभावस्यबलंयुक्तंकार्यं। तयासदृष्ट्यंघ्रियुक्तउग्रग्रह दृष्टिचरणोनकार्यः। पुनःस्वोच्चसप्तमयुक्तंचकार्यः एतदुक्तंभवति। भावेप्रतियहाणां दृष्टयःआगताः तत्रशुभदृष्टिचतुर्थांशेनतद्भावफलंयुक्तं। कार्यं पापग्रहदृष्टि चतुर्थांशेनहीनंकार्यं पुनः सकलयोर्बुधगुरुदृष्ट्याचयुक्तंकार्यं। इतिलग्नादि द्वादशभावानांबलंज्ञेयं॥ ॥जायांबाद्यूनभोनितेति। अथरुग्भीष्टकृष्टसाधनया अर्कचंद्रयोश्चेष्टाबलेकेंद्रबलेचाह। व्यर्केंदुस्त्रिभयुक्तेति। अत्रव्यर्केंदुशब्देनचंद्रस्यचेष्टा केंद्रस्यात्। त्रिभयुक्तसायनरविःराशिभयान्वितःसायनःसूर्यस्यचेष्टाकेंद्रस्यात्। ततस्ताभ्यांकेंद्राभ्यांबलंप्राग्वदिति। उच्चबलानयनरीत्याकुरु। किमर्थंगोक्तेष्टविधौ

रश्मीष्टकष्टसाधनेतेबलेवीर्ययुतभवतः॥चेष्टावीर्येनभवतः।यद्कस्या
यनबलंतदेवचेष्टाबलं।तत्रार्कस्यायनबलंद्विगुणितंपूर्वमेवकृतं।चंद्र
स्ययत्पक्षबलंतदेवचेष्टाबलं।अतःचंद्रस्यपक्षबलंद्विगुणितंपूर्वमिव
कृतं॥ ॥इतिश्रीकेशवदैवज्ञविरचितायांजातककर्मपद्धतौबलसाध
नाध्यायः॥ ॥अथेष्टकष्टदृग्फलादिज्ञानार्थमिष्टकष्टाध्यायआरभ्य
ते॥तत्रादौग्रहेरश्मीष्टकष्टसाधनमाह॥येचेष्टेत्यादि॥१॥येचेष्टोच्च
बलेरसेः षड्भिर्निहतैः सैकैकयुक्तैर्निजाः स्वीयारश्मयः।इतिउच्चबलात्
उच्चरश्मयः चेष्टाबलाच्चेष्टारश्मयः यस्यग्रहस्यबलंतस्यग्रहस्यज्ञेयाः।
अथार्कस्यचंद्रस्यरश्म्यर्थंइष्टकष्टार्थंचपूर्वमानितंबलंतदेवात्रग्राह्यं॥ ॥इ
तिरश्मिसाधनं॥चेष्टातुंगबलाहतेति।चेष्टाबलंतुंगबलाहतैः पदंमू

लंग्रहइष्टंग्रहस्यइष्टंभवति।बलोनेकमोरिति।चेष्टाबलंतुंगबलाभ्यांष्टथक्स्थनयोरेक
योरश्चचेष्टाबलयोर्घातान्मूलं।इदंहिग्रहस्यकष्टंभवति।तद्रूपंतदनुसारंग्रहस्यदृग्
फलंस्यात्।इष्टाधिक्येग्रहस्यदृग्फलंशुभंअधिकंस्यात्।कष्टफलाधिक्येदृग्फलम
निष्टंअधिकंस्यात्।इष्टकष्टयोःसाम्येदृग्फलंशुभंअशुभंचसमंस्यादित्यर्थः।ग्रह
स्यस्वीयंबलंइष्टेनकष्टेनचेष्टथक्कृतेतेकार्यतेदृष्टकष्टाख्यंबलंस्यात्।इष्टबलंकष्ट
बलंचूह्यं।अस्यप्रयोजनंग्रहस्यशुभफलंशुभबलवद्ज्ञातव्यं।अशुभफलंअशुभव
द्ज्ञातव्यं।अन्यत्रयोजनंचसप्तवर्गशुभाशुभसाधनेशुभघातमूलेनशुभंगुण्यं।अ
शुभघातमूलेनअशुभंगण्यंदृक्इत्यत्रज्ञजात्येकवचनं।दृक्इतिग्रहंप्रतियादृग्भः
आनीताःस्तास्वस्वग्रहस्यइष्टेनकष्टेनचेष्टथक्कृताःताःइष्टकष्टाख्याइतीष्टदृग्भाः
कष्टदृग्भाभवंति।एतत्प्रयोजनं।दृष्टेशुभफलंचेत्तर्हिइष्टदृष्टिवद्ज्ञातव्योयोजनीयं।दृष्टेर
शुभफलंतर्हिकष्टदृष्टिवद्ज्ञातव्यमितिसिद्धं।अथसप्तवर्गशुभाशुभस्त्रग्धराशाईल
विक्रीडितेनाह।स्वोच्चेत्यादिनिकाएतेति।१४॥अस्यार्थः एतत्शुभाशुभफलंइच्छात्वेरे
श्रावद्ज्ञातव्यं।तस्मिन्ग्रहेशेस्वोच्चेसतिरूपंशुभंस्यात्।त्रिकोणस्वमूलत्रिकोणेचरण

रहितंरूपं स्यात्। स्वर्क्षार्धं अधीष्टमैत्रयोष्टांशाः ३० इष्टसंयुजिमित्रराशिगतेचरणाः
२५ समसप्तमांशाः ७ वैरिभेसंयांशोषोऽष्टांशाः ३। ४५ अध्यरिसंयुजिअधिवैरिभगते
तुरङ्गः। १। ५२। नीचेऽन्यंस्यात्। अत्रयत्रोच्चनीचंवासंभवतितत्रान्यन्मित्रादिजनग्रा
ह्यं। एतद्गृहेगृहस्वामिनोगृहगृहस्वामिवशात्फलमिदंज्ञेयं। तद्यथा। गृहस्वामीयस्मिन्स्वो
च्चादिस्थानेस्थितःस्यात्तत्रोक्तंशुभंगृहेज्ञेयं। तदुनकंतेनशुभनदुनंएकरूपंगृहेअशुभंज्ञे
यं। अत्रएषट्स्थितिहोरादिषुषड्वर्गेषुदलमितिगृहवशादागतंशुभाशुभयोर्दलंज्ञेयं।
तद्यथा। होरादिवर्गस्वामीयस्मिन्स्वोच्चादिभेस्थितंउक्तंशुभंग्राह्यं। त्रद्रूपाच्छुभंअ
शुभंस्यात्। तयोःशुभाशुभयोर्दलंहोरादिषुवर्गेषुग्राह्यं। एवंसप्तवर्गस्थितानांशुभानां
ऐक्यं। अशुभानांचैक्यं। एवंतदैक्यकार्यंतितस्यशुभाशुभाख्यस्तः। अत्रस्वोच्चमूल
त्रिकोणस्वगृहाणांद्वयोर्वासंभवति॥ ॥कल्याणवर्मनिर्णयमाह॥ विंशतिरंशाः सिं
हे त्रिकोणमपरंस्वभवनमर्कस्य। उच्चंभागत्रितयंवृषभेंदोस्यत्रिकोणमपरंशाः॥
द्वादशभागामेषेत्रिकोणमपरंभौमस्य। उच्चफलंकन्यायांबुधस्यतुरगांशकेसदाचिं
त्यं॥२॥ दशमिर्भागैर्जीवस्यत्रिकोणंधनुषितत्परंस्वगृहं। परतस्त्रिकोणजातंपंचमि

रंशैः स्वराशिजंपरतः॥३॥ शुक्रस्यचतिसृभयोंशाः स्त्रिकोणमपरंस्वराशिश्च। कुंभेत्रि
कोणरविर्निजमरविजरविजायथासिंहः॥४॥ कन्याराशुरुद्वोक्तंराहुश्चमिथुनंस्मृ
तं। राहुर्नीचंधनुर्बाणादिकंज्ञानिवदस्यच॥५॥ अथकेकर्तव्यमाह॥ पंक्त्योःसप्तसको
ष्ठयोरिति। अस्यार्थः पंक्त्योःसप्तसकोष्ठयोः अर्थात्कोष्ठयोर्यग्रहस्यइष्टःसदैक्ये
कृतेतद्गृहंस्थाप्यं। अथतद्गृहस्थानंतदधोराशिषु होरादीनांषट्सुकोष्ठेषुपंक्ति
द्वयस्थाप्यंऊर्ध्वपंक्तौशुभंअधरपंक्तौअशुभंस्थाप्यं। ततोग्रहादिस्वामीनांस्वस्ववर्ग
स्वरूपेनस्वोच्चरूपमित्यादिरीत्याशुभाशुभैक्यकार्यं। नाभ्यांस्वीयाख्यांस्वस्ववर्गस्थं
शुभाशुभंगुणयेत्। ततोवर्गेष्टंतत्स्थवर्गोजसोः। सदसतोर्घातात्पदद्वयंतत्स्फुटंस्तः।
एतदुक्तंभवति। स्वगृहादिवर्गेस्थितोयोग्रहः सतत्स्थग्रहः स्वगृहादिवर्गेयत्रास्ति
तद्वर्गस्यस्वामीवर्गेष्टवर्गेश्वरः तयोःशुभवीर्ययोर्घातात्पदंतत्स्ववर्गस्थंशुभंगुणनीयं॥
वर्गेश्वरतत्स्थग्रहयोरशुभबलघातमूलेनस्ववर्गस्थंअशुभंगुणयेत्॥ तत्स्थग्रहगृहश्च
योरुक्तवन्मूलेनगृहस्थितंगुण्यंतत्स्थग्रहोरश्वरश्वरयोरुक्तवन्मूलेनहोरास्थगुण्यंएव
मन्यवर्गस्थेचएवंसप्तवर्गजंशुभंअशुभंचस्फुटंभवति। एतद्दृशात्ग्रहस्यग्रहादीनांशु

भाशुभफलंयोज्यं।वर्गफलंशुभंतहि तद्वर्गवशात्ज्ञेयं।अशुभंअशुभवशात्वेद्यं॥ ॥इतीश्रीके
शवदैवज्ञविरचितायांजातकपद्धतौस्फुटतरेकष्टसाधनाध्यायः॥ अथायुर्दायविनाश्र
हरणंदर्शाविभागोज्ञायतेजंतोःकिमितंजीवितमितिनज्ञायते।ग्रहाएवांयलिंचित्वषफ
लंदर्शास्वभुक्तवति।इतिप्रधानत्वायुर्दायाध्यायआरभ्यते॥स्वचाआयुर्दायोद्विधा।ग्रह
योगजोगणितागतश्च।ग्रहयोगजस्त्रिविधः।नियतआयुर्दायः।परमायुर्दायः।गणिता
गतश्चतुर्विधः।अंशोडुवःपिंडजोनैसर्गिकोजीवसंज्ञितश्च।तत्रादायोगजायुर्दाय
भेदस्यअभितायुर्दायस्यैकमुदाहरणमाह।कर्कीहीज्ययुतोदयेति।इंदुश्चेज्यश्चेंदुहि
ज्यौकर्कीद्वीज्याभ्यांयुतश्चासौउदयश्चअस्मिन्कर्कलग्नेचेंदुज्यावित्यर्थः।बुध
सितौकेंद्रभवतः।त्रयश्चअरिश्चईशाश्चत्र्यरीशेषुइतरैत्र्यरीशैतरैः।त्रि
संख्यास्त्रित्वंयस्यस्थानंअरिर्नाद्येनषष्ठेईशोद्येनलग्नकारस्तेषुइतरैपाप
ग्रहाःरविभौमसंदाःतैः।एवंसप्तग्रहाणांयोगैःअभितंअगणितमायुःवि १४
द्धिजानाहि।हीत्यवंयोगजमिव॥अन्यत्रजातकशास्त्रेयोगजंआयुःवि

द्धिजानीहिइत्यर्थःअत्रअस्यांजातकपद्धतौउन्मितंगणितायुरुच्यते॥
अथांशायुःसाधनायउच्चचेष्टायुणेः।ततःस्फुटगुणकमाह॥अल्पा
श्चेत्किरणाइतिचेत्किरणास्त्र्यल्पाःत्रिभ्योन्यूनाःतहिसरूपकिरणां
शैःरूपेणसहिताःसरूपाःसरूपाश्चतेकिरणाश्चतेषांअंशैश्चतु
र्थांशाःगुणःस्यात्॥अन्येत्रयोधिकिरणाःवतहिविभ्रमोर्धविग
ताभ्रेकोयेभ्यस्तेविलवःविभवश्चनेगावश्चतेषामर्धगुणकःस्यात्
एवंचेष्टकेंद्रसंभवगुणोस्तःचेष्टाकिरणेभ्योभवश्चेष्टकेंद्रतुंग
किरणेभ्यःसंभवोयस्यतुंगसंभवश्चेष्टकश्चतुंगसंभयश्च
चेष्टकेंद्रतुंगसंभवौतौचतौगुणौचचेष्टकेंद्रतुंगसंभवगुणौस्तः
तद्घातमूनंस्फुटोगुणःस्यात्॥तयोश्चेष्टगुणयोर्घातंमूनंस्फुट स्म

टोगुणः स्यात्॥ एतदुपाकसाधनं श्रद्धीफलं विना कृतं॥ ॥अथाश्रय
यगुणकमाह॥ यः स्वाधीष्टसुहृत्समेति। एतेवर्गेषुअंकाः स्वादीनां षण्णां
वर्गक्रमात् ज्ञेयाः स्वश्च मश्च रिपुश्च

एतेद्विघ्नाः	१८	१५	२७	८	५	३
एतेग्रहेषु	३६	३०	५४	१६	१०	६
	स्वं	अधिमित्रं	मित्रं	समं	शत्रु	अधिशत्रु

धृतिश्चेयादिषडंकाः अधीष्टश्च सुहृच्च स अधिरिपुश्च एतेषां समाहारः अधिरिपु तस्य अधिरिपोः स्वस्यवर्गे धृतिः अष्टादश १८ अधीष्टस्यवर्गे त्रिंशत् ३० पंचदश १५ सुहृद्वर्गे विंश २० सप्तवर्गअंकाः ८ अरिवर्गे इषवः ५ अधिरिपोर्वर्गे गुणाः १२ एवमेतेषां होरादिवर्गे एतेअंकाः स्युः ग्रहस्यानेयोंकः उक्तवदागच्छति सद्विगुणोग्रोह्यः। एवं सप्तवर्गेषु

स्वामिस्थानादागताः सप्तअंकाः ग्राह्याः परंतु ग्रहांकास्तद्विगुणा एव ग्राह्या इति॥ एवंक्रमेणैषां सप्तानां योयोगस्तं योगं स्वादीनां षण्णां तद्गुणं स्वग्रहस्यभेग्रहेसतिक्रमादेतैः षड्भिर्वक्ष्यमाणैः षड्गुणो हरेत्। तद्यथा॥ स्वस्यग्रहे षड्भिः षड्भिः १८ अधीष्टग्रहेवासुभिः षड्भिः ३० सुहृद्ग्रहेनवभिः षड्भिः ५४ समग्रहेअंशुमद्भिः वा हारनाभिः षड्भिः १६ अधिग्रहेधृतिभिः षड्भिः १० अधिरिपुग्रहेजिनेश्वतुर्विंशतिभिः षड्भिः १४ क्रमेण हरेदित्यर्थः। वर्गोत्तमे स्वांशैस्त्रिनवांशैश्च त्रिंशांशैश्चेत्कोणगतेग्रहेसति सदेवरसगुणैः १६ षत्रिंशद्भिर्हरेत्। नस्वादिग्रहागतहरणेत्यर्थः। एवंसतेलब्धं। अथाश्रयाद्व्ययगुणः स्यात्॥ अथाश्रयगुणकविशेषसंस्कारंचाह॥ आयुर्भाग्यांश्याहृ॥

चे दूर्गोन्नमपूर्वगति ॥१८॥ वर्गोन्नमपूर्वगइति वर्गोन्नमादिषु त्रिषु
वर्गोन्नमस्वांशो स्वनवांशोस्वद्रेक्काणगतोग्रहस्त्र्येस्तदापूर्वआनीतए
वआश्रयगुणः स्यात्॥अधिरिबुअधिसुहृद्भवतितदातद्गृहं
कात्रिषडुभक्कात्तल्लब्ध्याक्रमेणऊनयुक्कार्यः।तत्रअधिवैरिभेऊ
नःअधिमित्रभेयुक्।पूर्वानीतआश्रयगुणकः कार्यः।अरिष्ट इति।
अरिष्टभद्दष्टेग्रहेसतितद्गृहांकात्।अधिनवकाप्याक्रमेणऊनयु
क्कार्यः।अरिभेऊनेःइष्टभेयुक्तआश्रयगुणः कार्यःस्वभेसमभे
केवलोयथास्थितएव॥वर्गोन्नमादिषुत्रिषुगृहेसतिइतिसंस्कृत आ
श्रयगुणकः कार्यः नान्यथा।तस्फुटहतेमूलंतस्याश्रयगुणकस्यप्रा १६
गानीतस्फुटगुणकःस्याद्धृतेधृतिस्थमूलंसयोग्यैःकर्मयोग्यागु
णःस्यात्।अथरविदानींसूर्यादिसप्तानांतनोर्लग्नस्यचलवाःस्वयुगद्वेषाःस्मृता

रिंशद्भिर्भक्काःशेषाःद्वांशाःस्युषःअंशाःसंति।अथचक्रधातार्धहानिमाह।रसप्तघ्ने
सतिरवेश्चरोनउदयेति॥१९॥रवेश्चरोनउदयेलग्नेषड्घ्नेल्पसतिइयंहानिःनअन्यथा।अस्य
रवेश्चरोनितोदयस्यषड्घ्नेल्पस्यअंशोःउद्धृतेःखाग्निभिः२०त्रिंशद्भिःउनाभ्रुतिरेका
नःकार्यः।सोम्यानेसोम्यग्रहानितादृग्वेसतितदंशोद्धृतेःखाग्निभिः२०धृतिरवेरुना
भ्रुतिरूपमूलंकार्यगुणःस्यात्।रवेश्चरोनउदयेएकाल्पेतिअस्यरवेश्चरोनस्यउदय
स्यरवेःखाग्निभिःभाजितेःउनाभ्रुरेकःकार्यःसोम्यानितेउदयेसतिअधृतिरूनएकः
कार्योगुणकःस्यात्।एकोद्विवक्रुषुसत्कएकेपेहयोग्रहयोर्बक्रुषुवासत्कृतन्मध्ये
बलिनःएकग्रहस्यैवगुणकःकार्यःनान्यस्य।इदंसर्वेषामतं।सत्याचार्यवराहादिभिरे
तदेवोक्तंहरयुतिर्विहृत्यहसंख्ययेत्याद्यक्तंतदुपेक्षितं॥वराहादिभिःएवंयस्यग्रह
स्यगुणकउक्तस्तेतेनगुणेनभ्नाःगुणितानिजायुरंशजकलाःस्वायुर्दायेत्यवोत्याःकलाः
कार्याः।एवमन्यगुणनेवा।चक्राधहानिरुक्ता॥ ॥अथवर्षादिदृग्गायुर्दयानयनमाह॥
दायांशोत्थकलाःस्वयोग्यगुणकेति२०दायांशोत्थकलाःआयुर्दयांशानांकलाःस्वक
र्मयोग्यगुणकघ्नाःस्वीयेनकर्मयोगेनगुणेनगुण्याःखाभ्रनेत्रा२०ष्टताःशतहृताम

कालब्धंवर्षादिसमादिकंवर्षादिकंअंशायुर्भवति। अत्रायंविधिः आयुरंशोथकलाः स्वयोग्ये
नगुणेनगुणनीयाः। शतद्वयेन२०० भाज्याः फलंवर्षाणि। ततः शेषंद्वादशभिर्गुण्यं शतद्व
येनभाज्यंस्तल्लब्धंमासाः शेषंत्रिंशद्भिः संगुण्यं शतद्वयेनभाज्यंलब्धंदिनानि। ततः
शेषं षष्ट्यागुण्यशतद्वयेनभाज्यंलब्धंघटिकाः ततः शेषं षष्ट्यागुणितं द्विश
तेनहृतंलब्धंपलानि॥ इत्येवंसमादिः स्यात्। ततः तनोर्दायांशाएव त्र्याहताः
त्रिगुणिता दिभक्ताः समाघंलग्नायुः स्यात्॥ तत्रापि तषाधोमासाधान
यनंप्राग्वदेव॥ अथवेष्टलग्नंबलवत् षड्वेभ्योऽधिकं अधिकबलंतदा लग्न
भेस्वल्पाद्यैः सलग्नराशितुल्यैः वर्षैः पूर्वानीतंलग्नायुर्योज्यं। ततोद्वि
निघ्नंरश्युद्भागादितोमासयुक् कार्यं॥ द्वाभ्यांनिहन्यतइतिद्विनिघ्नं॥ रा
शेः पंचभिर्हृतं। इतिशरहृतं द्विनिघ्नंतच्छरहृच्चद्विनिघ्नंशरहृतंतच्च त
द्भागादिचततः मासादियुक्तंकार्यं। एतदुक्तंभवति। लग्नस्यराश्यधंस्वंभो
गाघंतद्विनिघ्नंकार्यं। ततः पंचभिर्भाज्यंलब्धंमासाः शेषंत्रिंशद्गुण्यं पंच

॥६७॥

भिर्भाज्यंलब्धंघटिकाः ततः शेषं षष्ट्या६० गुण्यं पंचभिर्भाज्यं ल
ब्धंपलानि। एवंमासादियुक्तं पूर्वागतंलग्नायुः कार्यं। मासयुगिति।
सावयवमासयुगित्यर्थः॥ ॥अथपिंडायुर्ज्ञानार्थंआयुर्भागानयन
माह॥ स्वोच्चोनोद्युचरोंगभात्समधिको इति॥३॥ स्वोच्चोनोग्रहः अंग
भास्त्रिभात्समधिको ग्राह्यः॥ षड्राश्येन्यूनेऽर्कंद्वादशरांशंग्राह्यं। त
स्यभागाः कार्याः॥ यदिग्रहोवैरिक्षेतर्हिनेभागाः गुणंशोनाः स्वयंशोनाः
कार्यइत्यर्थः॥ वक्रंवक्रगतिंविनावक्रगतस्यग्रहस्यवैरिक्षेपिस्वयंशो
नाः नकार्यइत्यर्थः॥ तथोक्तंश्रीधरपद्धतौ॥वक्रचारंविनात्यंतंशत्रु
राशौहरेग्रहः॥ तथाचश्रीपतिः॥ यंत्रांकंहरतिक्षेत्रेशत्रुक्षेग्रहस्तथोच्च
नुवक्रचारगः॥ तथाचदामोदरः॥ ततोविनावक्रगतिंहरेच्यन्निजात्

षष्ठंत्रासरिष्फहिबुकेहोरामकरंदेपि॥पंत्राहरंसकुटिलारिपुरात्रिसंस्थः
पतोवक्रगतोयहोबलवानतःस्वगृहेपिपंत्रंनहरति॥हित्वामित्रगृह
आनकेपाठात्॥वक्रंकुजमितिकैश्चिद्व्याख्यातं॥तदसत्॥असुकृत्तत्व
कुवाक्यविरोधाच्च॥यानिसितौविनावक्रास्तमितेग्रहेसतितेआयुर्भा
गाअध्यायाताःअधितांष्टिकार्याः॥यतःयानिसितोस्तंवैरिणोनस्तो
स्तंसन्निध्येनअस्तंगतावपिस्वायुषोर्धंनहरतः॥एतन्नानिद्व्येयु
गपत्प्राप्तेएकैवाधिकाहानिःकार्या॥नचुलंभवति॥वैरिसेपंत्रोहानि
स्तस्मिन्नस्तंगतेअर्धहानिःएवंहानिद्व्येप्राप्तेअधिकैकैवहानिरितिअर्ध
मेवहानिःयानिसतयोर्हानिद्व्येप्राप्तेपंत्राहानिरेवयनस्तयोरस्तहानिना
स्तेव॥तच्चाहयवनः॥खेचरोजायतेयोर्धंपंत्रायोरपहारकः॥असुपःसहरेद

पंत्रोछक्रानिश्चरादिति॥अथपिंडनिसर्गजीवेपिआयुर्दायेप्रागुदिते
ऽर्धहानिर्भवेत्॥षड्बलात्परतोनीतगुणेननेभागागुणनीयाइत्यर्थः॥पा
